62

शि. प्र. मंडळी, पुणे ९.
मीमांसा विद्यालय
卐 ग्रंथालय 卐
ग्रंथ नाव श्रुतबोध
(छंदशास्त्र)
लेखक [लिखित पत्रे ५]

पु १५:३८
१००७

श्रुतबोध



१००८ ९८३

श्रीगणेशायनमः॥अथश्रुतबोधप्रारंभः॥छंदसांलक्षणंयेनश्रुतमात्रेणबुध्यते॥तम
हंकथयिष्यामिश्रुतबोधमविस्तरं॥ १ ॥संयुक्ताद्यंदीर्घंसानुस्वारंविसर्गसंमिश्रं॥विज्ञे
यमक्षरंगुरुपादांतस्थंविकल्पेन॥ २ ॥यस्याःपादेप्रथमेद्वादशमात्रास्तथातृतीयेपि॥
अष्टादशद्वितीयेचतुर्थकेपंचदशसार्या॥ ३ ॥आर्यापूर्वार्धसमंयदिद्वितीयमपिमत्तहं
सगते॥छंदोविदस्तदानींगीतिंताममृतवाणिभाषंते॥ ४ ॥आर्योत्तरार्धतुल्यंपूर्वार्ध
मपिप्रयुक्तंचेत्॥कामिनीतामुपगीतिंप्रकाशयंतेमहाकवयः॥ ५ ॥आद्यचतुर्थंपंचम
कंचेत्यत्रगुरुःस्यात्साक्षरपंक्तिः॥ ६ ॥सलघुचतुष्कंभवतिगुरुहो॥घनकुचयुग्मेश

शिवदनासौ ॥७॥ तुर्यं पंचमकं चेत्त्यत्र स्याल्लघु बाले ॥ विद्वद्भिर्मृगनेत्रे प्रोक्ता सा मदले श्रु०
खा ॥८॥ श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पंचमं ॥ द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्य
योः ॥९॥ पंचमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ॥ तृतीये प्रथमे दीर्घमेतच्छ्लोकस्य
लक्षणं ॥१०॥ आदिगतं तुर्यगतं पंचमकं चांत्यगतं ॥ स्याद्गुरु चेन्माणवकक्रीडित
मुक्तं कविभिः ॥११॥ द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा ॥ तदा निवेदयंति तां बु
धा नगस्वरूपिणीं ॥१२॥ सर्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः ॥ विद्वद्वृंदैर्वर्
णा वाणिव्याख्याता सा विद्युन्माला ॥१३॥ नन्वि गुरु स्यादाद्यचतुर्थं पंचमषष्ठे पा २

त्स्यमथांसं ॥ इंद्रियबाणैर्यत्रविरामः साकथितेयंचंपकमाला ॥१३॥ चंपकमाला
यत्रभवेदंत्स्यविहीनाप्रेमनिधे ॥ छंदसिदक्षायेकवयस्तन्मणिमध्यंतेब्रुवते ॥१४॥
आद्यसमुद्रंबाणरसंदीर्घमनिंद्येचांत्यभवं ॥ मार्गणवेदैर्यत्रयतिस्तन्मणिबंधं
तत्कथितं ॥१५॥ चत्वारः प्राक्सुतनुगुरवः स्युर्दशैकादशौचेन्मुग्धेवर्णौतदनु
कुमुदामोदिनिद्वादशांत्यौ ॥ लह्व्यौत्यौयुगरसहयैर्यत्रकांतेविरामो मंदाक्रांतां
प्रवरकवयस्तान्वितांसंगिरंते ॥१६॥ मंदाक्रांतांत्यपनिरहितासात्कंकारेयदि
भवतिसा ॥ तद्विद्वद्भिर्ध्रुवमभिहिताज्ञेयाहंसीकमलवदने ॥१७॥ हंसोव

र्णोजायतेयत्रषष्ठः कंबुग्रीवेतद्वदेवाष्टमोस्यः॥ विश्रामःस्यात्तन्विवेदैस्तुरं श्रु०
गैस्तांभाषंतेशालिनींछांदसीयाः॥१९॥आद्यचतुर्थमहीननितंबेसप्तम
कंदशमंचतथांत्यं॥यत्रगुरुप्रकटंस्मरसारेतत्कथितंननुदोधकवृत्तं॥१
॥यत्रत्रिषट्सप्तममक्षरंस्यात्ह्रस्वंसुजंघेनवमंचतद्वत्॥गत्याविलक्षी
कृतहंसकांतेतामिंद्रवज्रांब्रुवतेकवींद्राः॥२०॥यदींद्रवज्राचरणेषुपूर्वे
भवंतिवर्णालघवःसुवर्णे॥अमंदमाद्यन्मदनेतदानीमुपेंद्रवज्राकथिता
कविंद्रैः॥२१॥यत्रद्वयोरप्यनयोस्तुपादाभवंतिसीमंतिनिचंद्रकांते॥ २

विद्द्भिराद्यैः परिकीर्तितासा प्रयुज्यतामित्युपजातिरेषा ॥ २२ ॥ यत्र द्वयोरप्य
नयोस्तु पादा भवंति मध्याः प्रथमेथ वांत्याः ॥ विपर्ययेणाथ वियोजितास्युः प्र
कीर्तितास्ता उपजातयो वा ॥ २२ ॥ इति विशेषतः ॥ आख्यानकीस्यात्त्र कु
टीकृतार्थेय द्वींद्रवज्राचरणः पुरःस्यात् ॥ उपेंद्रवज्राचरणास्त्रयोन्ये मनी
षिणोक्ताविपरीतपूर्वा ॥ २४ ॥ औपेंद्रवज्रश्चरणार्धयोस्तो तदन्यथास्ते
विपरीतपूर्वा ॥ इति विशेषः ॥ आद्यमक्षरमतस्तृतीयकं सप्तमं च नवमं
तथांतिमं ॥ दीर्घमिंदुमुखि यत्र जायते तां वदंति कवयो रथोद्धतां ॥ २५ ॥

अक्षरंहिनवमंदशमंचेद्यस्ययाद्रवतियत्रविनीते ।। एणचारुनयनेय 
दिसेवः स्वागतेतिकथिताकविभिःसा ।। २५ ।। ह्रस्वोवर्णस्यात्सप्त
मोयत्रबालेतद्वद्बुद्धिंबोधिन्यस्तएकादशाद्यः ।। बाणैर्विश्रामोनंतरंचे
तुरंगैर्नाम्नानिर्दिष्टासुभ्रुसावैश्वदेवी ।। २६ ।। सतृतीयकषष्ठमनंत
रतोनवमंविरतिप्रभवंगुरुचेत् ।। घनपीनपयोधरभारनतेननुतो
टकवृत्तमिदंकथितं ।। २७ ।। यदाद्येचतुर्थंततःसप्तमंस्यात्तथैवाक्षरंह
स्वमेकादशाद्यं ।। शरच्चंद्रविद्वेषिवक्त्रारविंदेतदुक्तंकवींद्रैर्भुजंगप्र 

प्रयातं ॥ २८ ॥ अयि कृशोदरि पंच चतुर्थकं गुरु च सप्तमकं दशमं तथा ॥ विर
तिजं च तथैव विचक्षणे द्रुतविलंबितमित्युपदिश्यते ॥ २९ ॥ प्रथमाक्षर
माद्यतृतीययोर्द्रुतविलंबितकस्य च पादयोः ॥ सखि यत्र गतं कमले क्षणे
भवति सुंदरि सा हरिणीप्लुता ॥ ३० ॥ उपेंद्रवज्राचरणेषु येंति मा उपोत्य
वर्णा लघवश्च ते कृताः ॥ मदोद्धुसद्ध्रूजितकामकार्मुके ब्रुवंति वंश
स्थमिदं कवीश्वराः ॥ ३१ ॥ यस्यामशोकांकुरपाणिपल्लवे वंशस्थपा
दा गुरुपूर्ववर्णकाः ॥ तारुण्यहेला रतिरंगलालसे तामिंद्रवंशीं कवयः

५ प्रचक्षते ॥ २२ ॥ यस्याः प्रिये प्रथमजमक्षरद्वयं तुर्यं तथा गुरु नवमं दशांत्यकं ॥ सांत्यं श्रु०
भवेद्युतिरपि चेद्युगग्रहैः सा लक्षिता त्वमृतलतप्रभावती ॥ २३ ॥ आद्यं चेत्रित
यमथाष्टमं नवांत्यं युग्मं चेत् गुरु विरतेषु भाषितं स्यात् ॥ विश्रामो भवति गजे
श्ववन्हवर्णैर्विज्ञेया ननु सुतनु प्रहर्षिणी सा ॥ २४ ॥ महेशनेत्रदिग्भिरितिवि
शेषः ॥ आद्यं द्वितीयमपि चेद्गुरु यच्चतुर्थं यत्राष्टमं च दशमांत्यमुपांत्यमंत्यं ॥
श्यामां कुशांकुशितमत्तगजेंद्रकामे कांते वसंततिलकां किल तां वदंति ॥ २५ ॥
प्रथमममगुरुषट्कं विद्यते यत्र कांते तदनु च दशमं चेदक्षरं द्वादशांत्यं ॥ करिभि ५

रथतुरंगैर्यत्र कांते विरामं सुकविजनमनोज्ञा मालिनी सा प्रदिष्टा ॥२६॥ सुमुखि लघ
वः पंच प्राच्यास्ततो दश मांति मस्तदनु ललिता ल्पापे यत्र त्रिपङ्क्ति चतुर्दशे ॥ प्रभवति
लघुर्यत्रो पांत्यः स्फुरत्करकंकणे यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणी तिसा ॥२७॥
यदि प्राच्यो ह्रस्वः कलितकमले षष्ठकपरे ततो वर्णाः पंच प्रकृति कुसुमांगि प्रगदि
ताः ॥ त्रयोन्ये सोपांत्याः सुतनु जघनाभोगसुभगे रसैरीशैर्यस्यां भवति विरतिः सा
शिखरिणी ॥२८॥ द्वितीयमलिकुंतले यदि षडष्टमं द्वादशं चतुर्दशमथ प्रिये
गुरु गभीरनाभिह्रदे ॥ सपंचदश मांत्यगं तदनु यत्र कांते यतिः कलांदुफण

१००७

भूकुलैर्भवति सुभ्रु पथ्वीति सा ॥ ३९ ॥ चत्वारः प्राक् सुतनु गुरवः स्युर्दशैकादशौ चे श्रु० बो०
॥५॥ ॥ न्मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशांत्यौ ॥ तद्वांत्यौ युगरसहयैर्यत्र कांते वि
रामो मंदाक्रांतां प्रवरकवयस्तन्वितां संगिरंते ॥ ४० ॥ आद्याश्चेद्गुरवस्त्रयः प्रिय
तमे षष्ठस्तथा चाष्टमः संत्येकादशतस्त्रयः प्रियतमे चाष्टादशाद्यौ ततः ॥ मार्तं
डैर्मुनिभिश्च यत्र विरतिः पूर्णेंदुबिंबानने तद्वृत्तं प्रवदंति काव्यरसिकाः शार्दूल
विक्रीडितं ॥ ४१ ॥ चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोपि द्वौ तद्वत्षोड
शाद्यौ मृगमदमुदिते षोडशांत्यौ तथांत्यौ ॥ रंभास्तंभोरु कांते मुनिमुनिमुनिभि
र्दृश्यते चेद्विरामो बाले वंद्यैः कवींद्रैः सुतनु निगदिता स्रग्धरेति प्रसिद्धा ॥ ४२ ॥ श्रु० सं० त०
५